# sAMkhyatattvapradIpaH

# સાઙ્ખ્યતત્ત્વપ્રદીપઃ

## Document Information

Text title : sAMkhyatattvapradIpa

File name : sAMkhyatattvapradIpa.itx

Category : major_works

Location : doc_z_misc_major_works

Transliterated by : Dhaval Patel drdhaval2785 at gmail.com

Proofread by : Dhaval Patel drdhaval2785 at gmail.com

Source : sAnkhyasaNgrahaH 1918

Latest update : September 15, 2014

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 24, 2024

*sanskritdocuments.org*

# સાઙ્ખ્યતત્ત્વપ્રદીપઃ

શ્રીગણેશાય નમઃ ।

પ્રકૃતિં પુરુષં શુદ્ધં પ્રણિપત્ય પ્રણીયતે ।
પ્રદીપઃ સાંખ્યતત્ત્વસ્ય પરોપકૃતયે મયા ॥

ઇહ ખલુ પ્રવાહવિધ્વસ્તોત્તરણોપાયા ઇવ સાંખ્યતન્ત્રાધ્યયનપરિશ્રમાલસાસ્તત્પ્રક્રિયાજ્ઞાનતરીવિહીનાઃ શબ્દોદધાવનન્યાવલમ્બનાઃ સીદન્તિ તત્તરણોપાયઃ સકલસાંખ્યપ્રક્રિયાદ્યોતકો બહ્વર્થોઽલ્પાક્ષરો મયા પ્રકાશ્યતે । કાપિલતન્ત્રાધ્યયનાલસૈસ્તત્પ્રક્રિયાજિજ્ઞાસાયામિદમેવ પ્રકરણં સમ્યગવલોકનીયમત્યુગ્રશુભાશુભાદૃષ્ટફલવત્ પ્રયત્નં વિનૈવ સર્વમત્રૈવાધિગન્તવ્યમ્ અયત્નલબ્ધેર્થે યત્નાદર્શનાત્ । ઉક્તં ચ સાંખ્યાચાર્યૈઃ ।
અર્કે ચેન્મધુ વિન્દેત કિમર્થં પર્વતં વ્રજેત્ ।
ઇષ્ટસ્યાર્થસ્ય સંસિદ્ધૌ કો વિદ્વાન્ યત્નમાચરેત્ ॥

ઋજુમાર્ગેણ સિદ્ધ્યતોઽર્થસ્ય વક્રેણ સાધનાયોગાત્ ઇતિ કેચિત્ । દુઃખત્રયાભિઘાતોદ્વિગ્નચિત્તાસ્તન્નિવૃત્ત્યુપાયમેવ તાવદભિકામયન્તે । તં ચાગ્રે દર્શયિષ્યામઃ । દુઃખત્રયં ચ આધ્યાત્મિકમાધિભૌતિકમાધિદૈવિકં ચ । તત્રાધ્યાત્મિકં દ્વિધા શારીરં માનસં ચ વાતપિત્તશ્લેષ્મણાં વૈષમ્યનિમિત્તં શારીરમ્ કામક્રોધલોભમોહેર્ષ્યાવિષાદવિષયવિશેષાદર્શનકારણકં માનસમ્ । આન્તરોપાયસાધ્યત્વાદાધ્યાત્મિકં દુઃખમિતિ વ્યપદિશ્યતે । બ્રાહ્મોપાયસાધ્યમપિ દુઃખં દ્વિવિધમ્ । આધિભૌતિકમાધિદૈવૈકં ચ । તત્રાધિભૌતિકં માનુષપક્ષિસરીસૃપસ્થાવરનિબન્ધનમ્ । આધિદૈવિકં પક્ષરાક્ષવિનાયકગ્રહાદ્યાવેશનિમિત્તમ્ । સર્વં માનસપ્રત્યક્ષમ્ । એતદ્ દુઃખં રજઃપરિણામવિશેષો નિત્યપરિણામિત્વાદિદમપિ નિત્યમિતિ

ન શક્યતે બાધિતુમ્ તથાપિ શક્ય એવ તદભિભવઃ કર્તું સાધનેન
તચ્ચ સાધનં શાસ્ત્રજનિતં પ્રકૃતિપુરુષાન્યતાજ્ઞાનં નાન્યદિતિ
તચ્છાસ્ત્રપ્રતિપાદ્યાર્થશ્ચતુર્વિધઃ તદ્યથા કશ્ચિદર્થઃ
પ્રકૃતિરેવ ન તુ કસ્યચિત્ વિકૃતિર્યથા મૂલપ્રકૃતિઃ
સા સર્વસ્ય મૂલમાદિકારણં ન તુ તસ્યાઃ કારણાન્તરં કિઞ્ચિત્
પ્રમાણસિદ્ધં તથાત્વે વા મૂલક્ષતિકારીત્યનવસ્થા સ્યાત્ સ્વસ્યૈવ
સ્વકારણત્વે તુ તસ્યાપેક્ષયા કારણત્વાત્ સ્વસ્યૈવ પૂર્વવર્તિત્વં
કાર્યત્વાત્ પશ્ચાદ્વર્તિત્વમિત્યસંભવઃ । સકારણત્વે અજામેકાં
લોહિતશુક્લકૃષ્ણામિત્યજત્વપ્રતિપાદનપરશ્રુતિવિરોધઃ સ્યાત્ । સા ચ
પ્રકરોતીતિ પ્રકૃતિઃ પ્રધાનં સત્ત્વરજસ્તમસાં સામ્યાવસ્થા ।
કશ્ચિદર્થઃ પ્રકૃતિર્વિકૃતિશ્ચ તચ્ચ મહત્તત્ત્વમહઙ્કારઃ
પઞ્ચતન્માત્રાણિ ચેતિ સપ્તસઙ્ખ્યાકો ગણઃ કસ્યચિત્પ્રકૃતિઃ
કસ્યચિદ્વિકૃતિઃ । તદ્યથા મહત્તત્ત્વમહઙ્કારસ્ય પ્રકૃતિર્વિકૃતિશ્ચ
મૂલપ્રકૃતેઃ તથા અહઙ્કારઃ પઞ્ચતન્માત્રાણામિન્દ્રિયાણાં ચ
પ્રકૃતિર્વિકૃતિર્મહતઃ તથા પઞ્ચતન્માત્રાણિ ભૂતાનામાકાશાદીનાં
પ્રકૃતયો વિકૃતયશ્ચાહઙ્કારસ્ય । પઞ્ચ મહાભૂતાન્યેકાદશેન્દ્રિયાણિ
ચેતિ ષોડશસઙ્ખ્યાકો ગણો વિકૃતિરેવ ન તુ કસ્યચિત્પ્રકૃતિઃ ।
નનુ પૃથિવ્યાદીનામપિ ગોઘટવૃક્ષાદયો વિકારા ઉપલભ્યન્તે તથા
તદ્વિકારવિશેષાણાં પયોબીજાદીનાં દધ્યઙ્કુરાદય ઇતિ કથં વિકૃતિત્વમેવ
તેષામિતિ ચેન્ન તત્ત્વાન્તરોપાદાનત્વં પ્રકૃતિત્વમિહાભ્યુપગતમ્ ન ત્વેતેષાં
તદસ્તિ સ્થૌલ્યેન્દ્રિયગ્રાહ્યતયા ગોઘટાદીનાં સમાનત્વાત્ ન તત્ત્વાન્તરતા
પૃથિવ્યાદિભ્યઃ । ઉક્તં ચ તત્ત્વકૌમુદ્યામ્ "સર્વેષાં ગોઘટાદીનાં
સ્થૂલતેન્દ્રિયગ્રાહ્યતા ચ સમેતિ" ન તત્ત્વાન્તરમ્ । પુરુષસ્તુ ન કસ્યચિત્
પ્રકૃતિરપરિણામિત્વાન્નાપિ વિકૃતિર્નિત્યત્વાદન્યથા સાધનસાધ્યાભિવ્યક્તિઃ
સ્યાત્ ઘટવત્ ।
પ્રમાણવિરહિણોઽર્થસ્ય નૃશ◌ૃઙ્ગસાદૃશ્યાભ્યુપગમાત્ ।
ઉક્તપ્રમેયસાધકં ત્રિવિધં પ્રમાણમુરરીકત્યમ્
પ્રત્યક્ષમનુમાનમાપ્તવચનં ચેતિ । સાઙ્ખ્યાચાર્યૈઃ ।
અન્યવાદ્યઙ્ગીકૃતપ્રમાણાનામેતેષ્વેવ ત્રિષ્વન્તર્ભાવઃ । ઉક્તં
ચ 'સર્વપ્રમાણસિદ્ધત્વાદિતિ' સર્વેષાં વાદ્યન્તરાભ્યુપગતાનાં
પ્રમાણાનાં સિદ્ધત્વાત્ ત્રિષ્વેવાન્તર્ભાવાદિત્યર્થઃ । નનુ યત્ર
યત્ર પ્રત્યક્ષમપ્રવર્તમાનં તત્તદત્યન્તાઽસદિતિ વ્યાપ્તિઃ

સુપ્રસિદ્ધા શશશૃઙ્ગકૂર્મલોમાદૌ એવં પ્રધાનસ્યાપિ
પ્રત્યક્ષાસિદ્ધત્વાત્ તદત્યન્તાસત્ત્વમેવ યુક્તં ગગનકુસુમાદીનામિવેતિ
ચેન્ન નહિ યત્ પ્રત્યક્ષાગોચરં તદત્યન્તાસદિતિ વ્યાપ્તિગ્રહો
યુક્તોઽન્યથા ગૃહાન્નિર્ગતસ્ય ગૃહધનપુત્રપશુવનિતાદીન્
સુખસાધનભૂતાનપશ્યતસ્તન્નાશનિશ્ચયજદુઃખવિપ્લુષ્ટાન્તઃકરણસ્ય
રુદતો મરણં સ્યાત્ ન ત્વેવમસ્તિ । કિઞ્ચ કિં સર્વપ્રત્યક્ષવિષયત્વં
સત્ત્વે હેતુઃ કિઞ્ચિત્પ્રત્યક્ષવિષયત્વં વા ? નાદ્યઃ
નહિ ગૃહાન્તરદેશાન્તરકાલાન્તરગતં વસ્તુ કેનાપ્યયોગિના
પ્રત્યક્ષેણ વિષયીકર્તું શક્યમન્યથા સર્વ એવ સર્વજ્ઞઃ સ્યાત્
પરબુદ્ધેરપ્રત્યક્ષતયા સર્વૈઃ સર્વં પ્રત્યક્ષેણ ગૃહ્યતે
નવેત્યસર્વજ્ઞેન નિશ્ચેતુમશક્યતયા સંશયાનિવૃત્તેઃ ।
નાપિ ચરમઃ વ્યભિચારાત્ નહિ નગરસ્થેન સ્વેનાનુપલબ્ધો ગવય
એતાવતૈવારણ્યકોપલબ્ધસ્ય તસ્યાપલાપસમ્ભવઃ । ઉક્તઞ્ચ લીલાવતીકારેણ
"સર્વાદૃષ્ટેશ્ચ સન્દેહાત્ સ્વાદૃષ્ટેર્વ્યભિચારત" ઇતિ । તસ્માત્
પ્રત્યક્ષપ્રવૃત્તિપ્રતિકૂલાભાવવિશિષ્ટં પ્રત્યક્ષં યત્ર ન પ્રવર્તતે
તદત્યન્તાસદિતિ નિશ્ચેતું શક્યમ્ ન તુ પ્રત્યક્ષાપ્રવૃત્તિમાત્રાત્ અન્યથા
પુરુષપ્રધાનમહત્સ્વર્ગાપૂર્વદેવતાદીનામતીન્દ્રિયાણામત્યન્તાભાવઃ સ્યાત્ ।
તેન વિયતિ ગચ્છતઃ પતત્રિણો ગ્રહણેઽતિદૂરત્વમેવ પ્રતિકૂલમ્
તથા નેત્રગતકજ્જલગ્રહણેઽતિસામીપ્યમ્ એવં રૂપશબ્દાદિગ્રહણે
આન્ધ્યબધિરત્વાદયઃ તથા વિષયગ્રહણે મનસઃ કામાદ્યભિવ્યાપ્તિઃ યથા
કામાદ્યભિવ્યાપ્તમનાઃ સ્ફીતાલોકમધ્યવર્તિનમિન્દ્રિયસન્નિકૃષ્ટમપ્યર્થં ન
પશ્યતિ । પરમાણ્વાદિવિષયતાયાં સૌક્ષ્મ્યમેવ પ્રતિકૂલમ્ યતઃ પ્રણિહિતમના
અપિ તં ન પશ્યતિ । ભિત્ત્યાદિપરવસ્તુગ્રહણે તદ્વ્યવધાનમેવ પ્રતિકૂલં
સમ્પ્રતિપન્નપદાર્થગ્રહણે હસ્તાદિવ્યવધાનવત્ । ક્વચિદભિભવઃ
યથા અહનિ સૌરીભિર્ભાભિરભિભૂતં નક્ષત્રસૂર્યાદિગ્રહે
ચક્ષુઃ સમર્થં ન ભવતિ । ક્વચિત્ સમાનાભિહારઃ પ્રતિકૂલં યથા
જલાશયેઽમ્બુદવિમુક્તજલબિન્દુગ્રહણે નેત્રાસામર્થ્યમ્ । ક્વચિદનુદ્ભવઃ
યથા ક્ષીરદધ્યાદ્યવસ્થાયાં દધિઘૃતાદિવિવેચનાસામર્થ્યમ્ । એવં સતિ
દૃઢતરપ્રમાણાન્તરપ્રસિદ્ધે વસ્તુનિ પ્રત્યક્ષાપ્રવૃત્તાવેતદન્યતમં
પ્રતિબન્ધકં કલ્પ્યતે ન તુ તદભાવાદેવાપ્રવૃત્તિઃ । ઉક્તઞ્ચ
સાઙ્ખ્યમૂલકારેણ "સૌક્ષ્મ્યાત્ તદનુપલબ્ધિર્નાભાવાત્" । નનુ
ક્વચિત્પ્રત્યક્ષપ્રસિદ્ધસ્ય ક્વચિત્સન્દેહાદનુમાનવિષયતા ન

ત્વસ્ય તદસ્તીત્યભાવ એવ યુક્ત ઇતિ ચેન્ન કાર્યં હિ કારણાનુમાપકં
ભવતીતિ સર્વવાદ્યભિમતમ્ તથા ચ મહદાદિકાર્યાન્યથાનુપપત્ત્યૈવ
પ્રધાનસિદ્ધિરિતિ ન તદભાવો યુક્તઃ । નનુ કાર્યાન્યથાનુપપત્ત્યા
કારણસિદ્ધૌ તન્ત્રાન્તરાભિમતકારણસિદ્ધિઃ સેત્સ્યતિ ન તુ
ત્વદભિમતપ્રધાનસિદ્ધિરિતિ ચેન્ન મતપર્યાલોચનેન યન્મતં
કપિલસૂત્રનિબદ્ધં પ્રધાનસાધનાનુગુણં તદેવ યુક્તિસહમન્યત્ તુ
બાહ્યમતવત્ મતાભાસત્વાદ્બાધ્યમેવ । તદ્યથા 'અસતઃ સજ્જાયત' ઇતિ
બૌદ્ધમતે પ્રધાનસિદ્ધિઃ 'સતઃ સજ્જાયત' ઇતિ સાઙ્ખ્યમતવિરુદ્ધત્વાન્ન
પણ્ડિતમુખમણ્ડનાયાલમ્ સદસતોઃ કાર્યકારણભાવાસમ્ભવાત્ અસદલીકં
કારણં સત્ત્વાદિરૂપશબ્દાદ્યાત્મકં કથં સ્યાત્ સદસતોસ્તાદાત્મ્યદર્શનાત્
કાર્યં હિ કારણસમવેતં તન્તુપટાદિસ્થલેષુ પ્રસિદ્ધમ્ તથા ચ ઘટોઽસન્
પટોઽસન્નિત્યસત્સમવેતં સર્વો વ્યવહર્તા વ્યવહરેત ન તુ સદિદમિતિ
સત્તાવૈશિષ્ટ્યેન પ્રતીતિઃ સ્યાત્ ।
અથ સદ્વિવર્તોઽયં પ્રપઞ્ચ ઇતિ યદ્વેદાન્તિમતમ્ । તદપ્યસાધુ અનેનાપિ
સતઃ સજ્જાયત ઇતિ મતસિદ્ધિર્ન સ્યાત્ । અદ્વયસ્ય સદ્વયતયા ભાને રજ્જોઃ
સ્રક્ખણ્ડસર્પ્પાદ્યાત્મના ભાનવત્ ભ્રાન્તિરેવ સ્યાત્ બાધિતવિષયતયા
રજ્જુસર્પપ્રત્યયવત્ પ્રપઞ્ચજ્ઞાનસ્યાપ્રમાણતયા પ્રમારૂપં
જ્ઞાનમેવાસ્તમિયાત્ । ન ચેષ્ટાપત્તિર્ગુરુશિષ્યોત્તરપ્રશ્નયોરપ્રમાણબુદ્ધ્યા
વ્યવહારમાત્રોચ્છેદઃ સ્યાત્ લૌકિકવૈદિકવ્યવહારાનુષ્ઠાને ચ કસ્યચિત્
પ્રવૃત્ત્યનુપપત્ત્યા ભોગાપવર્ગૌ ન સ્યાતામિતિ તચ્છાસ્ત્રાપ્રામાણ્યં સ્યાત્ ।
અપસિદ્ધાન્તશ્ચ ન હિ વેદાન્તિમતે બ્રહ્મ વિવર્તિ ભવતિ । ઉક્તઞ્ચ -
બાલાન્ પ્રતિ વિવર્તોઽયં બ્રહ્મણઃ સકલં જગત્ ।
અવિવર્તિતમાનન્દમાસ્થિતાઃ કૃતિનઃ સદા ॥ ઇતિ ।
સતોઽસજ્જાયત ઇતિ સતઃ પરમાણોરસદ્દ્વ્યણુકાખ્યં કાર્યં
જાયત ઇતિ કણભક્ષાક્ષચરણમતમપિ ન યુક્તિસહમ્
તથા હિ પરમાણુર્હિ દ્વ્યણુકસમવાયિકારણમ્ દ્વ્યણુકં
ચાસદિત્યસત્ત્વાવિશેષાચ્છશશૃઙ્ગાદિસમવાયિકારણતાપિ પરમાણૌ
સ્યાત્ સદસતોઃ સમવાયાસમ્ભવાચ્ચ અસતા તાદાત્મ્યે સતોપ્યસત્ત્વં
સ્યાત્ નન્વસત્ત્વં નામ પ્રાગભાવપ્રતિયોગિત્વં ન તુ વાયુરૂપાદિવત્
ત્રિકાલાસત્ત્વમિતિ ચેન્ન કિમિદં પ્રાગભાવપ્રતિયોગિત્વમસત્ત્વમ્ કિં
પ્રાગભાવપ્રતિયોગિત્વાદસત્ત્વમસત્ત્વાદ્વા પ્રાગભાવપ્રતિયોગિત્વમ્ ? નાદ્યઃ
સર્વેષાં કાર્યપદાર્થાનામસત્ત્વાવિશેષેણાકાશપુષ્પાદિષ્વિવાસત્ત્વેનૈવ

વ્યવહારઃ સ્યાત્ તેષામપિ પ્રાગભાવપ્રતિયોગિત્વાત્ તથા ચ કાર્યપદાર્થગતગુણસામાન્યાદીનામુચ્છેદઃ સ્યાત્ તેષાં ભાવધર્મત્વેનાસત્ત્વેનાવસ્થાનાત્ । ન ચ કૂર્મલોમાદેરસ્યાસતો વિશેષઃ સામાન્યાદ્યભાવેન ભેદકધર્માભાવાત્ । નાપિ ચરમઃ અસત્ત્વાત્પ્રાગભાવપ્રતિયોગિત્વે નરશ‍ૃઙ્ગાદીનામપિ પ્રાગભાવપ્રતિયોગિત્વં સ્યાત્ પ્રાગભાવસ્ય ચ સ્વપ્રતિયોગ્યુત્પાદકત્વનિયમેન સર્વેષામસતાં સત્ત્વં સ્યાત્ સદસદ્વિભાગો જગતિ દત્તજલાઞ્જલિઃ સ્યાદિતિ ન તાર્કિકવૈશેષિકમતં વિચારસહમ્ । તસ્માત્ સતઃ સજ્જાયત ઇતિ સાઙ્ખ્યમતમેવ યુક્તિસહમ્ । સતઃ કારણાત્ સ્વોત્પત્તેઃ પ્રાગપિ સદેવ કાર્યં કારણવ્યાપારાદભિવ્યક્તિમાપ્નોતિ । ન ચ સિદ્ધસાધનતા કારણવૈયર્થ્યં ચેતિ વાચ્યમ્ કાર્યસત્ત્વેऽપિ તદભિવ્યક્તૌ કારણં પ્રયોજનવદિતિ ન કિઞ્ચિદવદ્યમ્ । અસત્કાર્યપક્ષે તુ કારણવૈયર્થ્યં સ્ફુટમેવ ન હ્યસતઃ કારણસમ્બન્ધો નિરૂપયિતું શક્યતે સમ્બદ્ધમેવ અસમ્બદ્ધેન જન્યતે અસમ્બદ્ધસ્ય જન્યત્વે સર્વસ્માત્ સર્વં સ્યાત્ કારણનિયમોऽસ્તમિયાત્ । અસચ્ચેત્કાર્યં ન કારણવ્યાપારાત્ સદ્ભવિતુમર્હતિ ઉક્તઞ્ચ તત્ત્વકૌમુદ્યામ્ - નહિ નીલં શિલ્પસહસ્રેણાપિ પીતં કર્તું શક્યમ્ । ન ચ કારણવ્યાપારાત્ પૂર્વં ઘટોऽસન્ સંશ્ચ વ્યાપારાનન્તરમિતિ ઘટસ્ય સત્ત્વાસત્ત્વે ધર્માવિતિ વાચ્યમ્ ધર્મસ્ય ભાવધર્મત્વેન તેનૈવ ધર્મિણઃ સત્ત્વં સ્વસ્થિત્યન્યથાનુપપત્ત્યા સાધિતમિતિ સદેવ કાર્યં કારણવ્યાપારાદૂર્ધ્વમિવ પ્રાગપિ । કારણવ્યાપારસ્તુ તદભિવ્યક્તાવનન્યથાસિદ્ધઃ અન્યત્રાપિ કારણવ્યાપારાદભિવ્યક્તિરેવ દૃશ્યતે યથાऽવઘાતેન ધાન્યેષુ તણ્ડુલાનામ્ અવપીડનેન તિલેષુ તૈલસ્ય દોહનેન સૌરભેયીણાં પયસ ઇતિ । અસદુત્પત્તૌ તુ ન દૃષ્ટાન્તોऽસ્તિ તસ્માત્ સદેવ કાર્યં કારણવ્યાપારેણાભિવ્યજ્યતે । અસતા કારણસમ્બન્ધાસમ્ભવાત્ ન તસ્ય તદુત્પાદકત્વમ્ ઉક્તઞ્ચ સાઙ્ખ્યાચાર્યૈઃ
અસત્ત્વાન્નાસ્તિ સમ્બન્ધઃ કારણૈઃ સત્ત્વસઙ્ગિભિઃ ॥

અસમ્બદ્ધસ્ય ચોત્પત્તિમિચ્છતો ન વ્યવસ્થિતિઃ ॥

કિઞ્ચ સમ્બદ્ધમપિ તદેવ કરોતિ યત્ર યત્ કારણં શક્તમ્ શક્તિશ્ચ કાર્યૈકાધિગમ્યા યથા ચક્ષુષૈવ રૂપજ્ઞાનં ભવતિ નેન્દ્રિયાન્તરેણેતીદમેવ તત્ર શક્તમિત્યધિગમ્યતે । તથા ચ સા શક્તિઃ શક્તકારણાશ્રયા શક્યકાર્યાશ્રયા સર્વત્ર વા સ્યાત્ ? અન્ત્યે સર્વસ્માત્ સર્વં સ્યાત્ । અથ કાર્યે સા શક્તિસ્તદા કથમસતઃ કાર્યસ્ય શક્ત્યાશ્રયતા તથા

ચ શક્તેન શક્યમુત્પાદ્યતે શક્યં ચ કારણાત્મકમ્ કારણં ચ સદિતિ
કથં તદભિન્નં કાર્યમસત્સ્યાત્ 'ઉક્તઞ્ચ શક્તસ્ય શક્યકરણાદિતિ' ।
ઉપાદાનોપાદેયભાવગ્રહણાચ્ચ ન ભેદસ્તન્તુપટયોર્યયોર્ભેદો ન
તયોરુપાદાનોપાદેયભાવો યથાશ્વવૃક્ષયોઃ । ઇતોઽપિ નાર્થાન્તરત્વં
તન્તુપટયોઃ સંયોગાપ્રાપ્ત્યદર્શનાત્ અર્થાન્તરત્વે સંયોગો દૃષ્ટો
રજ્જુઘટકુણ્ડબદરાદૌ અપ્રાપ્તિરપિ દૃષ્ટા સુમેરુવિધ્યયોરિવ
ઇહ ચ સંયોગાપ્રાપ્ત્યોરભાવાન્ન તન્તુભ્યોઽર્થાન્તરં પટઃ ।
કાર્યકારણયોરભેદસાધકં પ્રમાણં ચોક્તં સાઙ્ખ્યાચાર્યૈઃ તદ્યથા ન
પટસ્તન્તુભ્યો ભિદ્યતે તદ્ધર્મત્વાત્ ઇહ યદ્યતો ભિદ્યતે તત્ તસ્ય ધર્મો
ન ભવતિ યથા ગૌરશ્વસ્ય ધર્મશ્ચ પટસ્તન્તૂનાન્તસ્માન્નાર્થાન્તરમ્ ।
ગુરુત્વાન્તરાગ્રહણાદપિ ન કારણાદર્થાન્તરં કાર્યમ્ । એવમભેદે
સિદ્ધે તન્તવ એવ તેન તેન સંસ્થાનવિશેષેણ પરિણતાઃ પટો ન તુ
પટસ્તન્તુભ્યોઽર્થાન્તરમ્ । ન ચાત્માશ્રયબુદ્ધિભેદાદર્થક્રિયાભેદાચ્ચ
ભેદસિદ્ધિઃ કાર્યકારણયોરિતિ વાચ્યમ્ એકસ્મિન્નપિ
વિશેષાન્તરાવિર્ભાવતિરોભાવાભ્યામાત્માશ્રયાર્થક્રિયાબુદ્ધિભેદસમ્ભવાન્ન
તદન્યથાનુપપત્ત્યા ભેદસિદ્ધિઃ । તત્ર એકસ્યાપિ કૂર્મસ્યાવયવા
નિઃસરન્ત્યાવિર્ભવન્તિ ત એવ કૂર્મશરીરે નિવિશમાનાસ્તિરોભવન્તિ
નહિ તે કૂર્માવયવા ઉત્પદ્યન્તે ધ્વંસન્તે વા એવમેકસ્યાપિ સુવર્ણસ્ય
મૃદો વ કટકકુણ્ડલાદયો ઘટાદયો નિઃસરન્ત ઉત્પન્ના ઇતિ વ્યવહારં
ભજન્તે ત એવ નિવિશમાનાસ્તિરોભવન્તિ નશ્યન્તીત્યુચ્યન્તે ન પુનઃ
સદસતોર્નિરોધોત્પાદયોર્નિદર્શનમસ્તિ । ઉક્તં ચ ભગવતા નાસતો વિદ્યતે
ભાવો નાભાવો વિદ્યતે સત ઇતિ । યથા સઙ્કોચવિકાશવદ્ભ્યઃ સ્વાવયવેભ્યઃ
કૂર્મો ન ભિદ્યતે તથા મૃત્સુવર્ણાદિભ્યોઽપિ કટકકુણ્ડલાદયો ન ભિન્નાઃ ।
ન ચ નામ બુદ્ધ્યર્થક્રિયાભેદાત્ કાર્યકારણયોર્ભેદસિદ્ધિરિતિ વાચ્યમ્
નટે વ્યભિચારાત્ । નટો હિ દશરથોઽહં રામોઽહં યુધિષ્ઠિરોઽહમિતિ
સ્વયમનન્તનામા ભૂત્વા નામાન્તરેણ વેશાન્તરમર્થક્રિયાન્તરઞ્ચ કુરુતે
તથા ચ સત્યપિ ભેદત્રયે નટભેદાદર્શનાત્ યથાહુઃ -

રૂપમથો અપિ કાર્યમથો
અભિધાપિ નટસ્ય પૃથગ્વિદિતા ।
ન પૃથક્ત્વમુપૈતિ નટઃ કિમિતિ
પ્રતિવાચ્યમવશ્યમિદં કુશલૈઃ ॥

એકસ્યાપિ વહ્નેર્દાહકત્વપાચકત્વભેદેન નાનાર્થક્રિયાકારિત્વં દૃશ્યતે ન હ્યેતાવતા વહ્નિર્ભેદમધિગચ્છતિ એકૈકસ્ય તૃણસ્યાતપવૃષ્ટ્યાદિનિવૃત્તાવસામર્થ્યેઽપિ બહૂનિ મિલિત્વાવસ્થાવિશેષમવાપ્ય યથા તાન્યેવ તન્નિવૃત્તૌ સામર્થ્યમધિગચ્છન્તિ તથૈક એવ તન્તુઃ પ્રાવરણાદ્યર્થક્રિયાસમર્થોઽપિ મિલિતાસ્ત એવાવસ્થાવિશેષં પ્રાપ્યાવિર્ભૂતપટભાવાઃ પ્રાવરણાદ્યર્થક્રિયાં કરિષ્યન્તિ તસ્માત્સદેવ કાર્યં કારણાત્ તદભિવ્યક્તિરિતિ । નન્વાવિર્ભાવઃ કારણવ્યાપારાત્પૂર્વં સન્નસન્ વા ? આદ્યે કારણવ્યાપારાસમ્ભવઃ નહિ સદુત્પત્તૌ કેનાપિ કારણાનિ વ્યાપાર્યન્તે । અન્ત્યે પ્રાગ્સમસદુત્પાદનત્વમિતિ ચેન્ન તવાપિ કેયમુત્પત્તિઃ સત્યસતી વા ? આદ્યે ન કારણપ્રયોજનં પશ્યામઃ । અન્ત્યેઽસદુત્પત્તિરુત્પદ્યત ઇતિ તદુત્પત્તેરપ્યુત્પત્ત્યન્તરં તત્રાપ્યન્યદિતિ સ્ફુટૈવાનવસ્થા । અથ પટાત્ તદુત્પત્તિર્નાતિરિચ્યતે તદા પટ ઇત્યુક્તે પુનરુત્પદ્યતે ઇતિ ન વાચ્યં પૌનરુક્ત્યાત્ તથોત્પદ્યતે ઇત્યુક્ત્વા પુનઃ પટ ઇતિ ન વાચ્યં પૂર્વોક્તદોષાદેવ પટો વિનશ્યતીત્યપિ ન વાચ્યં વિરોધાત્ તસ્માત્સ્વસત્તાસમવાયો વા સ્વકારણસમવાયો વા પટોત્પત્તિઃ સમવાયસ્ય ચ નિત્યત્વેન સર્વથાપિ ન પટોત્પત્તિઃ સમ્ભવતિ ન તદર્થઞ્ચ કારણાનિ વ્યાપાર્ય્યન્તે તથા ચ સત એવ પટાદેરાવિર્ભાવે કારણાપેક્ષેતિ ન કિઞ્ચિદવદ્યમ્ । ન ચ પટાદિકાર્યરૂપેણ કારણસમ્બન્ધસ્તસ્યાક્રિયત્વાત્ ક્રિયાસમ્બધિત્વાત્કારકાણામન્યથા કારકત્વક્ષતિઃ સ્યાત્ તસ્માત્સત્કાર્યમિતિ સ્થિતમ્ ।

દુઃખત્રયાભિભવસાધનં પ્રકૃતિપુરુષાન્યતાજ્ઞાનં તદુપયોગિત્વાત્ વ્યક્તવૈરૂપ્યં પ્રતિપાદનીયમ્ । તચ્ચ વ્યક્તં પૃથિવ્યાદિ તચ્ચાવ્યક્તાત્પ્રધાનાદ્વિલક્ષણમ્ યત ઇદં સકારણકં તત એવાનિત્યં પરાભિમતવિનાશસામગ્ર્યા તિરોભવતિ । અવ્યાપકં ચ કારણં હિ કાર્યં વ્યાપ્નોતિ ન તુ કાર્યં કારણમ્ । સક્રિયં ચ બુદ્ધ્યાદયઃ પૂર્વપૂર્વોપાત્તં દેહં પરિત્યજન્તિ દેહાન્તરં ચોપાદદતે સૈવ તેષાં ક્રિયા પૃથિવ્યાદીનાં ક્રિયા પરિણામરૂપેણ પ્રસિદ્ધૈવ । પ્રતિપુરુષં બુદ્ધ્યાદિભેદાદનેકમ્ તથા ઘટશરીરાદિભેદેન પૃથિવ્યાદ્યપ્યનેકમ્ । સ્વકારણાશ્રિતમ્ યદ્યપિ બુદ્ધ્યાદીનાં પ્રધાનભેદાભાવાત્ નાશ્રયાશ્રયિભાવસ્તથાપિ કથઞ્ચિત્ ભેદવિવક્ષયાશ્રયાશ્રયિભાવો યથેહ વને તિલકાઃ । સાવયવમવયવાવયવિસંયોગસંયોગિબુદ્ધિપ્રધાનયોસ્તુ ન સંયોગસ્તાદાત્મ્યાત્ નાપિ સત્ત્વરજસ્તમસાં સંયોગઃ અપ્રાપ્તિપૂર્વિકા પ્રાપ્તિઃ સંયોગસ્તદભાવાત્ ।

નિત્યમેવ પરતન્ત્રં સ્વકાર્યેઽહઙ્કારાખ્યે જનયિતવ્યે પ્રકૃત્યા પૂરમપેક્ષતે અન્યથા ક્ષીણા સતી નાહઙ્કારં જનયિતું ક્ષમા ભવતિ તથાહઙ્કારોઽપિ સ્વકાર્યે પ્રકૃત્યા પૂરમપેક્ષતે એવં કારણમાત્રં સ્વકાર્યે જનયિતવ્યે તદપેક્ષાં કુરુતે તથા ચ સ્વકાર્યે જનયિતવ્યે પરતન્ત્રં વ્યક્તમ્ । યત ઇત્યભિવ્યાપ્ય યદુક્તં તદ્વિપરીતમવ્યક્તમ્ યદ્યપ્યવ્યક્તસ્ય પરિણામલક્ષણાક્રિયાસ્તિ તથાપિ ન પરિસ્પન્દઃ ॥

ઇદાનીં વ્યક્તાવ્યક્તયોઃ સાધર્મ્યં પુરુષાચ્ચ વૈધર્મ્યં પ્રતિપાદનીયમ્ । વ્યક્તં હિ ત્રિગુણં ત્રયો ગુણાઃ સુખદુઃખમોહાત્મકા અસ્યેતિ । અત્ર કાર્યકારણયોરભેદાત્ સુખાદિશબ્દૈઃ સત્ત્વાદયોઽભિધીયન્તે ત્રિગુણમિત્યુક્ત્યા સત્ત્વાદીનામાત્મગુણત્વં પરાભિમતમપાકૃતં વેદિતવ્યમ્ । તથા અવિવેકિ યથા પ્રધાનં સતો ન વિવિચ્યતે તથા મહદાદયોઽપિ પ્રધાનાન્ન વિવિચ્યન્તે તત્સ્વરૂપત્વાત્ । યદ્વા સંભૂયકારિતાઽવિવેકઃ નહ્યેકં કિઞ્ચિત્કાર્યં જનયિતું ક્ષમં ભવત્યપિ તુ સંભૂય સર્વઃ સર્વં કરોતિ । એવમચેતનં પ્રધાનબુદ્ધ્યાદયઃ સર્વે અચેતના તથા પ્રસવરૂપધર્મવન્તઃ । એતે વ્યક્તધર્માઃ કથિતાસ્ત એવાવ્યક્તસ્યાપીત્યવગન્તવ્યમિદમેવ વ્યક્તાવ્યક્તયોઃ સાધર્મ્યમ્ ॥

એતે સાધર્મ્યવૈધર્મ્યાભ્યાં વ્યક્તાવ્યક્તે નિરૂપિતે તદુભયગતધર્મરહિતત્વાત્ વિપરીતઃ પુરુષ ઇતિ પુરુષસ્ય વ્યક્તાવ્યક્તવૈધર્મ્યમ્ । નન્વહેતુમત્ત્વનિત્યત્વાદિ પ્રધાનસાધર્મ્યં પુરુષસ્ય પ્રતીયતે તથા ચાનેકત્વં વ્યક્તસાધર્મ્યમેવં સતિ કથં વ્યક્તાવ્યક્તવિપરીતઃ પુરુષ ઇતિ ચેન્ન અહેતુમત્ત્વાદિસાધર્મ્યેઽપ્યત્રૈગુણ્યાદ્યસ્યાસ્ત્યેવ વૈધર્મ્યમિતિ ન દોષઃ । ન ચ ત્રૈગુણ્યમપ્રસિદ્ધમ્ પ્રીત્યપ્રીતિવિષાદાત્મકા ગુણા ઇતિ સાંખ્યાચાર્યાઃ । અત્ર ક્રમેણ પ્રીતિઃ સુખં તદેવ સત્ત્વમ્ તથા અપ્રીતિર્દુઃખમપ્રીત્યાત્મકો રજો ગુણઃ એવં વિષાદો મોહો વિષાદાત્મકસ્તમોગુણઃ । યન્મતે પ્રીતિર્દુઃખાભાવઃ તથા દુઃખમપિ પ્રીત્યભાવસ્તન્નિવૃત્ત્યર્થં મૂલકારેણાત્મગ્રહણં કૃતમાત્મશબ્દસ્ય ભાવતત્ત્વેન નેતરેતરાશ્રયસ્તથાસત્યેકસ્યાપિ સિદ્ધિર્ન સ્યાત્ । પ્રકાશપ્રવૃત્તિનિયમનમેષાં ક્રમેણ પ્રયોજનમપ્યવગન્તવ્યમ્ । ક્રિયાત્મકેન રજસ લઘુ સત્ત્વં સર્વત્ર નીતં સ્યાદતિવાયુના તૂલાવયવવદ્યદિ ગુરુણા તમસા નિયમનં ન સ્યાત્તમોનિયતં તુ ક્વચિદેવ પ્રવર્તયતિ તતસ્તમો નિયમાર્થમ્ । અન્યોન્યાભિભવવૃત્તયઃ ।

એતેષામન્યતમેનાર્થવશાદુદ્ભૂતેનાન્યતમમભિભૂયતે તદ્યથા સત્ત્વં
રજસ્તમસી અભિભૂયાત્મનઃ શાન્તાં વૃત્તિમધિગચ્છતિ તથા રજઃ
સત્ત્વતમસી અભિભૂય ઘોરાં વૃત્તિમેતિ એવં તમઃ સત્ત્વરજસી
અભિભૂય મૂઢામિતિ । તથાઽન્યોન્યાશ્રયવૃત્તયઃ । યથાહુઃ
સત્ત્વં પ્રવૃત્તિનિયમાવાશ્રિત્ય રજસ્તમસોઃ પ્રકાશેનોપકરોતિ રજઃ
પ્રકાશનિયમાવાશ્રિત્ય પ્રવૃત્યેતરયોઃ તમઃ પ્રકાશપ્રવૃત્તી આશ્રિત્ય
નિયમેનેતરયોરિતિ । તથા અન્યોન્યજનનવૃત્તયઃ । અન્યતમોઽન્યતમં
જનયતિ જનનમત્ર પરિમાણઃ સ ચ ગુણાનાં સદૃશરૂપઃ । અત એવ
ન હેતુમત્ત્વં તત્ત્વાન્તરસ્ય હેતોરભાવાત્ । નાપ્યનિત્યત્વં તત્ત્વાન્તરે
લયાભાવાત્ । અન્યોન્યસંજ્ઞાવ્યભિચારિણશ્ચ । ઉક્તઞ્ચ
અન્યોન્યમિથુનાઃ સર્વે સર્વે સર્વત્રગામિનઃ ।
રજસો મિથુનં સત્ત્વં સત્ત્વસ્ય મિથુનં રજઃ ॥

તમસશ્ચાપિ મિથુને તે સત્ત્વરજસી ઉભે ।
મિથુનવૃત્તિત્વં સહચારાવ્યભિચારિત્વમ્ ॥

ઉભયોઃ સત્ત્વરજસોર્મિથુનં તમ ઉચ્યતે ।
નૈષામાદિઃ સમ્પ્રયોગો વિયોગો વોપલભ્યતે ॥ ઇતિ ।
નિયતકૃત્યં તુ તેષામિદં લઘુત્વં પ્રકાશકત્વં ચ સત્ત્વસ્યૈવ ન તુ
તયોઃ કસ્યચિત્ તત્રોર્ધ્વગમનહેતુભૂતો ધર્મો લાઘવં ગૌરવાસહવર્તિ
યતોઽગ્નેરૂર્ધ્વજ્વાલા ગતિર્ભવતિ તદેવ કસ્યચિત્તિર્યગ્ગમને હેતુર્યથા
વાયોઃ । એવં કરણાનાં વૃત્તિકુશલતાહેતુર્લાઘવં ગુરુત્વે તુ તાનિ
મન્દાનિ સ્યુરિતિ સત્ત્વસ્ય પ્રકાશાત્મકત્વમુક્તમ્ । સત્ત્વતમસી અક્રિયતયા
સ્વકાર્યોત્પાદનેઽવસીદન્તી રજસોપષ્ટભ્યેતે । અવસાદાદ્વિમુચ્યોત્સાહે
પ્રયત્નવતી ક્રિયેતે । ઉક્તં ચ
સત્ત્વં લઘુ પ્રકાશકમિષ્ટમુપષ્ટમ્ભકં ચલં ચ રજઃ ।
કુત ઉપષ્ટમ્ભકં યતશ્ચલમિતિ । રજશ્ચલતયા સર્વતસ્ત્રૈગુણ્યં
ચાલયેદ્યદિ ગુરુણા આવૃણ્વતા તમસા તત્ર પ્રતિબન્ધો ન સ્યાત્ તમસા
તુ તતસ્તતો વ્યાવૃત્ત્ય ક્વચિદેવ પ્રવર્ત્યતે ઇતિ નિયામકં તમઃ ।
યથાહુઃ ગુરુ વરણકમેવ તમ ઇતિ । તથાચ લઘુ પ્રકાશકં સત્ત્વમેવ
ઉપષ્ટમ્ભકં ચલં ચ રજ એવ ગુરુ વરણકં તમ એવ । નનુ પરસ્પરં
વિરોધશીલાનાં ગુણાનાં સુન્દોપસુન્દન્યાયેન પરસ્પરં બાધ એવ યુક્તો
ન ત્વેકકાર્યકર્તૃત્વમિતિ ચેત્ ન એવંભૂતાનામપ્યેકકાર્યકર્તૃતાયાઃ

પ્રદર્શનાત્ । તદ્યથા વર્ત્તિતૈલે અનલવિરોધિની અથાનલેન મિલિત્વા
રૂપપ્રકાશલક્ષણં કાર્યં કુરુતઃ યથાચ વાતપિત્તશ્લેષ્માણઃ
પરસ્પરં વિરોધશીલા અપિ મિલિતાઃ સન્તઃ શરીરધારણકાર્ય્યકારિણઃ
તથા સત્ત્વરજસ્તમાંસિ વિરુદ્ધશીલાન્યપિ સહ વર્ત્સ્યન્તિ મિલિત્વા ચૈકં
કાર્ય્યં કરિષ્યન્તિ ચ પુરુષાર્થવશાત્ । ઉક્તઞ્ચ પ્રદીપવચ્ચાર્થતો
વૃત્તિરિતિ । ગુણાનાં પ્રધાનાત્મકત્વાદૈક્યેઽપ્યભિભાવ્યાભિભાવકરૂપેણ
નાનાત્વમ્ । ઉક્તં એકૈવ સ્ત્રી ગુણકુલરૂપશીલયૌવનસમ્પન્ના સ્વામિનં
સુખાકરોતિ તત્ કસ્ય હેતોસ્તં પ્રતિ તસ્યાઃ સુખરૂપસમુદ્ભવાત્ સૈવ
સપત્નીર્દુઃખાકરોતિ તત્કસ્ય હેતોસ્તાં પ્રતિ તસ્યાઃ દુઃખરૂપસમુદ્ભવાત્
એવં પુરુષાન્તરં તામવિન્દમાનં સૈવ મોહયતિ  તત્કસ્ય હેતોસ્તં પ્રતિ
તસ્યાઃ મોહરૂપસમુદ્ભવાત્ । અનયા સ્ત્રિયા સર્વે ભાવા વ્યાખ્યાતાઃ । તત્ર
યત્સુખકારણં તત્સુખાત્મકં સત્ત્વમ્ એવં યત્ દુઃખકારણં તત્ દુઃખાત્મકં
રજઃ તથા યન્મોહહેતુસ્તન્મોહાત્મકં તમઃ । તસ્માત્કારણવ્યાપારાત્સદેવ
કાર્યં પૂર્વમ્ । તદેવ પુનસ્તદ્વ્યાપારાદાવિર્ભવતિ યથા સન્ત્યેવ
કૂર્માઙ્ગાનિ નિઃસરન્તિ વિભજ્યન્તે ઇદં કૂર્મશરીરમેતાનિ તદઙ્ગાનિ
તેન તાનિ સઙ્કોચિતાનિ તસ્મિન્નવ્યક્તીભવન્તિ તથા મૃત્સુવર્ણાદિભ્યઃ
સન્ત્યેવ ઘટકુણ્ડલાદીન્યાવિર્ભવન્તિ વિભજ્યન્તે ઇયં મૃદયં તત્કાર્યો
ઘટ ઇત્યાદિ । તથા સન્ત્યેવ પૃથિવ્યાદીનિ કારણાત્તન્માત્રાદાવિર્ભવન્તિ
વિભજ્યન્તે ઇદમસ્ય કારણમિદમસ્ય કાર્યમિતિ તથા સન્ત્યેવ
તન્માત્રાણ્યહઙ્કારાદાવિર્ભવન્તિ વિભજ્યન્તે એવં સન્નેવાહઙ્કારો
મહતોઽભિવ્યક્તિમેતિ સન્નેવ ચ મહાન્મૂલપ્રકૃતેરભિવ્યક્તિં
યાતિ । એવં કારણભૂતાત્પરમાવ્યક્તાત્સાક્ષાત્પારમ્પર્યેણ સમન્વિતસ્ય
કાર્યભૂતસ્ય પ્રપઞ્ચસ્ય વિભાગઃ । સર્ગમાત્રં મૃત્પિણ્ડં હેમપિણ્ડં
વા વિશન્તો ઘટકુણ્ડલાદયોઽવ્યક્તીભવન્તિ કારણરૂપેણાભિવ્યક્તા અપિ
કાર્યરૂપેણાનભિવ્યક્તીભવન્તિ તથા પૃથિવ્યાદયસ્તન્માત્રાણિ વિશન્તઃ
સ્વસ્વરૂપેણ તન્માત્રાણ્યભિવ્યક્તયન્તિ સ્વસ્વરૂપેણ કારણમભિવ્યક્તમપિ
કાર્યસ્વરૂપં સ્વકીયં સ્વસ્મિન્નનભિવ્યક્તયતિ તન્માત્રાણિ તથાહઙ્કારં
વિશન્ત્યહઙ્કારં સ્વાપેક્ષયાઽવ્યક્તયન્તિ તથાહઙ્કારો મહાન્તં વિશન્
મહાન્તમવ્યક્તયતિ મહાન્પ્રધાનં સ્વકારણં વિશન્ તદવ્યક્તયતિ પ્રધાનસ્ય
તુ ન ક્વચિત્પ્રવેશોઽકારણત્વાદપિ તુ તત્સર્વકાર્યાણામવ્યક્તમ્ કારણમ્
એવમવિભાગઃ । પ્રકૃતૌ વિશ્વસ્યૈવં વિભાગાવિભાગૌ ।
કેચન અવ્યક્તં વા મહાન્તં વાહઙ્કારં વા ઇન્દ્રિયાણિ વા ભૂતાનિ

વા આત્મત્વેનાદાય તાનેવોપાસતે તે તુ વક્ષ્યમાણરીત્યાઽપાકરણીયાઃ ।
અવ્યક્તાદેર્વ્યતિરિક્તઃ પુરુષોઽસ્તિ અવ્યક્તમહદહઙ્કારાદયઃ
પરાર્થાઃ કુતઃ સઙ્ઘાતત્વાત્ યઃ સઙ્ઘાતો ભવતિ સ પરાર્થો
દૃષ્ટસ્તૈલતામ્બૂલઘૃતદધિદુગ્ધાન્નવસ્ત્રાદિવત્ સુખદુઃખમોહાત્મકત્વેન
સર્વે સઙ્ઘાતાસ્તથાચ યદર્થં સઙ્ઘાતાઃ સ એવ પુરુષઃ । નનુ
શયનાસનાદિઃ સઙ્ઘાતઃ સઙ્ઘાતશરીરાદિપરાર્થો દૃષ્ટો ન ત્વાત્માનં
પ્રતિ પરાર્થઃ તસ્માત્સઙ્ઘાતાન્તરમેવ સાધયેયુર્નાસંહતમાત્માનમિતિ
યદુક્તમ્ તન્ન સાધુ સઙ્ઘાતસ્ય સઙ્ઘાતાન્તરાર્થત્વે તસ્યાપિ
સઙ્ઘાતત્વાત્સંઘાતાન્તરાર્થતા તસ્યાપિ સઙ્ઘાતત્વાત્તથાત્વં તસ્યાપિ
તથાત્વમિત્યનવસ્થા દુસ્તરા સ્યાત્ । કિઞ્ચ સઙ્ઘાતસ્ય પારાર્થ્યમાત્રેણ
વ્યાપ્તિર્ન તુ સઙ્ઘાતપારાર્થ્યેન । ન ચ દૃષ્ટાન્તદૃષ્ટત્વાત્તથા
કલ્પ્યત ઇતિ વાચ્યમ્ । દૃષ્ટાન્તદૃષ્ટયાવદ્ધર્માણાં દાર્ષ્ટાન્તિકે
સાધનાયાનુમાનમિચ્છતો દૃષ્ટાન્તમહાનસાદિગતમહાનસત્વાદેઃ
પર્વતાદાવભાવાત્સર્વાનુમાનોચ્છેદઃ સ્યાત્ । યથાહુઃ ત્રિગુણત્વાદયો હિ
ધર્મા સઙ્ઘાતત્વેન વ્યાપ્તાઃ તે તુ અસ્મિન્પરે વ્યાવર્તમાનાસ્ત્રૈગુણ્યાદિ
વ્યાવર્તયન્તિ બ્રાહ્મણ્યમિવ નિવર્તમાનં કઠત્વાદિકમ્ । અધિષ્ઠાનાદપિ
પુરુષાસ્તિત્વં સિદ્ધ્યતિ ત્રિગુણાત્મકાનાં બુદ્ધ્યાદીનામધિષ્ઠીયમાનત્વાત્
યથા રથાદિર્યન્ત્રાદિભિરધિષ્ઠીયતે તથા સુખદુઃખમોહાત્મકં
બુદ્ધ્યાદિ પરેણાધિષ્ઠાતવ્યમ્ । ભોક્તૃભાવાદપિ પુરુષાસ્તિત્વમવસેયમ્
ભોગ્યે હિ સુખદુઃખે અનુકૂલપ્રતિકૂલવેદનીયે પ્રત્યાત્મમનુભૂયેતે
તેનાનયોરનુકૂલતયા પ્રતિકૂલતયા વાઽનુભવિત્રા કેનચિદ્ભવિતવ્યમ્ ।
ન ચ બુદ્ધ્યાદિરેવ તથેતિ વાચ્યમ્ । તેષાં સુખાદ્યાત્મકત્વેન
સ્વેનૈવ સ્વવેદને આત્માશ્રયઃ સ્યાત્ । કૈવલ્યાર્થં પ્રવૃત્તેરપિ
પુરુષાસ્તિત્વં સિદ્ધમ્ દુઃખત્રયાત્યન્તિકનિવૃત્તિલક્ષણં કૈવલ્યં ન
તાવદ્બુદ્ધ્યાદીનાં તે હિ સુખદુઃખમોહાત્મકાઃ કથં સ્વભાવાદ્વિયોજયિતું
શક્યાઃ તસ્માત્કૈવલ્યાર્થમાગમાનાં મહાધિયાં ચ પ્રવૃત્તેરસ્તિ
બુદ્ધ્યાદ્વ્યતિરિક્ત આત્મેતિ પુરુષાસ્તિત્વં સિદ્ધમ્ । નનુ ભવત્વેવં
બુદ્ધ્યાદ્યતિરિક્તાત્મસિદ્ધિસ્તથાપિ સ કિં પ્રતિશરીરં ભિન્ન એક એવ વેતિ
ચેદ્ભિન્ન એવેતિ બ્રૂમઃ જન્મમરણાદિવ્યવસ્થાન્યથાનુપપત્ત્યા બહુત્વસ્યૈવ
સમ્ભવાત્ । ઉક્તં ચ સાંખ્યાચાર્યૈઃ ।
જન્મમરણકરણાનાં પ્રતિનિયમાદયુગપત્પ્રવૃત્તેશ્ચ ।
પુરુષબહુત્વં સિદ્ધં ત્રૈગુણ્યવિપર્યયાચ્ચૈવ ॥

જાતિવિશિષ્ટાભિરપૂર્વાભિર્દેહેન્દ્રિયમનોઽહઙ્કારબુદ્ધિવેદનાભિઃ
પુરુષસ્યાભિસમ્બન્ધો જન્મ ન તુ પુરુષસ્ય પરિણામસ્તસ્યાપરિણામિત્વાત્
તેષામેવ ચ દેહાદીનામુપાત્તાનાં પરિત્યાગો મરણં ન ત્વાત્મનો
વિનાશસ્તસ્ય કૂટસ્થસ્ય નિત્યત્વાત્ । બુદ્ધ્યાદીનિ કરણાનિ
ત્રયોદશ તેષાં જન્મમરણકરણાનાં પ્રતિનિયમો વ્યવસ્થા સા ત્વિયં
શર્વશરીરેષ્વેકસ્મિન્પુરુષે ન સમ્ભવતિ તથા સત્યેકસ્મિન્સુખિનિ
સર્વે સુખિનઃ સ્યુઃ દુઃખિનિ વા દુઃખિનો ભવેયુઃ તથા એકસ્મિન્ મ્રિયમાણે
સર્વે મ્રિયેરન્ જાયમાને ચ જાયેરન્ એવમેકસ્મિન્નન્ધબધિરાદૌ સર્વ
એવ તથા સ્યુઃ ન ત્વેવમસ્તિ તથા એકસ્મિન્વિચિત્તે સર્વે વિચિત્તાઃ
સ્યુરિત્યવ્યવસ્થા પુરુષભેદે તુ સમ્યગુપપદ્યતે વ્યવસ્થા ।
નચૈકસ્મિન્નપિ પુરુષે દેહાન્તરોપાધિવશાત્ ઉપપદ્યત એવ વ્યવસ્થેતિ
વાચ્યમ્ કરચરણસ્તનાદિભેદેનાપિ જન્મમરણાદિવ્યવસ્થા સ્યાત્ ।
ગુણત્રયવિપર્યયાદપિ પુરુષબહુત્વમવસેયમ્ । તદ્યથા કેચિત્સત્ત્વબહુલાઃ
યથોર્દ્ધ્વસ્રોતસઃ કેચિદ્રહોબહુલાઃ યથા મનુષ્યાઃ કેચિત્તમોબહુલાઃ
યથા તિર્યગ્યોનયઃ ।
પુરુષસ્ય બહુત્વવદત્રિગુણત્વં વિવેકિત્વમવિષયત્વમસાધારણત્વં
ચેતનત્વમપ્રસવધર્મિત્વં સાક્ષિત્વાદિકમપિ બોદ્ધવ્યમ્ ।
પ્રધાનપુરુષયોઃ સંયોગકૃતોઽયં સર્ગઃ સ ચાપેક્ષાં વિના
ભિન્નયોર્ન સમ્ભવતિ અપેક્ષા ચ સ્વદર્શનાર્થં પુરુષેણ પ્રધાનસ્ય
પ્રધાનં હિ વિષયાત્મકતયા ભોગ્યમ્ ભોગશ્ચ ભોક્તારમન્તરેણ
ન ભવતીતિ ભોક્ત્રપેક્ષા પ્રધાનસ્ય પુરુષસ્ય સ્વકૈવલ્યાર્થં
પ્રધાનાપેક્ષા પ્રધાનેન હિ ભોગ્યેન સમ્ભિન્નઃ પુરુષસ્તદ્ગતં
દુઃખત્રયં સ્વાત્મન્યભિમન્યમાનઃ કૈવલ્યં પ્રાર્થયતે તત્તુ
સત્ત્વપુરુષાન્યતાખ્યાતિકારણકં સત્ત્વપુરુષાન્યતાખ્યાતિશ્ચ પ્રધાનમન્તરા
ન ભવતીતિ પુરુષસ્ય પ્રધાનાપેક્ષયા પઙ્ગ્વન્ધવદુભયોઃ સંયોગઃ
ભોગાયાનાદિપરમ્પરાસંયુક્તોઽપિ કૈવલ્યાય પુનઃ સંયુજ્યતે સ ચ સંયોગો
મહદાદિસર્ગમન્તરેણ ભોગાપવર્ગયોઃ સમર્થો ન ભવતીતિ સંયોગ એવ
મહદાદિસર્ગં કરોતિ । ઉક્તઞ્ચ ।
પ્રકૃતેર્મહાંસ્તતોઽહઙ્કારસ્તસ્માદ્ગણશ્ચ ષોડશકઃ ।
તસ્માદપિ ષોડશકાત્પઞ્ચભ્યઃ પઞ્ચ ભૂતાનિ ॥

એકાદશેન્દ્રિયાણિ પઞ્ચ તન્માત્રાણિ ચેતિ ષોડશસંખ્યામિતો ગણઃ
ષોડશકઃ । ઉક્તઞ્ચ તત્ર શબ્દતન્માત્રાદાકાશં શબ્દગુણમ્,
શબ્દતન્માત્રસહિતાચ્ચ સ્પર્શતન્માત્રાદ્વાયુઃ શબ્દસ્પર્શગુણઃ,
શબ્દસ્પર્શતન્માત્રસહિતાદ્રૂપતન્માત્રાત્તેજઃ શબ્દસ્પર્શરૂપગુણં,
શબ્દસ્પર્શરૂપતન્માત્રસહિતાદ્રસતન્માત્રાચ્છબ્દસ્પર્શરૂપરસગુણં જલમ્,
શબ્દસ્પર્શરૂપરસતન્માત્રાસહિતાદ્ગન્ધતન્માત્રાચ્છબ્દસ્પર્શરૂપરસગન્ધગુણા
પૃથિવી જાયતે ।
અધ્યવસાયો બુદ્ધિઃ ક્રિયાક્રિયાવતોરભેદવિવક્ષયા વ્યપદેશઃ ।
ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમિતિ સાત્ત્વિકાઃ બુદ્ધિધર્માઃ
એતદ્વિપરીતાસ્ત્વધર્માદયસ્તામસાઃ । બુદ્ધિધર્માદૈશ્વર્યાદણિમાદિપ્રાદુર્ભાવઃ ।
તચ્ચ
અણિમા મહિમા ચૈવ ગરિમા લઘિમા તથા ।
પ્રાપ્તિઃ પ્રાકામ્યમીશિત્વં વશિત્વં ચાષ્ટસિદ્ધયઃ ॥ ઇતિ ।
નન્વેકાદશક ઇન્દ્રિયગણઃ પઞ્ચતન્માત્રકં ચેતિ દ્વિવિધઃ પ્રવર્તતે
સર્ગોઽહઙ્કારાત્ તથા ચૈકસ્માદહઙ્કારાત્ કારણાત્કથં પ્રકાશજડાત્મકો
વિલક્ષણઃ સર્ગ ઇતિ યદુક્તં તન્ન સુન્દરમ્ પ્રકાશલાઘવાભ્યામેકાદશક
ઇન્દ્રિયગણઃ સાત્ત્વિકાદહઙ્કારાદ્ભવતિ ભૂતાદેસ્ત્વહઙ્કારાત્
તામસાત્તન્માત્રગણઃ । યદ્યપ્યેકોઽહઙ્કારસ્તથાપિ ગુણોદ્ભવાભિભવાભ્યાં
ભિન્નં કાર્યં કરોતિ । નનુ યદિ સત્ત્વતમોભ્યામેવ સર્ગઃ કૃતં તર્હિ
રજસા અકિઞ્ચિકરેણેતિ ચેન્ન તૈજસાદુભયમિતિ મૂલકરઃ તૈજસાદુભયં
ગણદ્વયં ભવતિ સર્ગદ્વયં સત્ત્વતમસોરિતિ । યદ્યપિ રજસો ન
કાર્યાન્તરમસ્તિ તથાપિ સત્ત્વતમસી સ્વયમક્રિયે સમર્થે અપિ ન કાર્યં
કુરુતો રજસા ચાલિતે તુ તત્પ્રસાદાત્ પ્રાપ્તક્રિયે સ્વકાર્યોત્પાદને સમર્થે
ભવત ઇતિ રાજસાદુભયમ્ । યથાહુઃ ઉભયસ્મિન્નપિ કાર્યે સત્ત્વતમસોઃ
ક્રિયોત્પાદનદ્વારેણાસ્તિ રજસઃ કારણત્વમિતિ ન વ્યર્થં રજ ઇતિ ।
ઇન્દ્રિયવિચારસ્તુ તત્ત્વપ્રદીપે કૃત ઇતિ વિસ્તરભયાન્નેહ પ્રતન્યતે ।
મહદહઙ્કારમનાંસ્યન્તરિન્દ્રિયાણિ તાનિ સ્વલક્ષણાનિ સ્વમસાધારણં
લક્ષણં યેષાં તાનિ સ્વલક્ષણાનિ તચ્ચ મહતોઽધ્યવસાયઃ
અહઙ્કારસ્યાભિમાનઃ સઙ્કલ્પો મનસો વૃત્તિર્વ્યાપારઃ । એતેષાં
વૃત્તિદ્વૈવિધ્યં સાધારણત્વાસાધારણત્વાભ્યામાહ સૈષા ભવત્યસામાન્યા
ઇતિ । એષોક્તાઽસાધારણી વૃત્તિઃ સાધારણી વૃત્તિસ્તુ કરણાનાં પ્રાણાદ્યા
વાયવઃ પઞ્ચ કરણત્રયસ્ય પઞ્ચ વાયવો વૃત્તિર્જીવનં તદ્ભાવે ભાવાત્

અભાવે ચાભાવાત્ । તત્ર પ્રાણો નાસાગ્રહૃન્નાભિપાદાઙ્ગુષ્ઠવૃત્તિઃ અપાનઃ કૃકાટિકાપૃષ્ઠપાર્શ્વપાયૂપસ્થવૃત્તિઃ સમાનો હૃન્નાભિસર્વસન્ધિવૃત્તિઃ ઉદાનો હૃત્કણ્ઠતાલમૂર્ધભ્રૂમધ્યવૃત્તિઃ વ્યાનસ્ત્વગ્વૃત્તિરિતિ પઞ્ચ વાયવઃ ।
અવિદ્યા પઞ્ચવિધા તથાહિ અવિદ્યાઽસ્મિતારાગદ્વેષાભિનિવેશા યથાસંખ્યં તમોમોહમહામોહતામિસ્રાન્ધતામિસ્રસંજ્ઞકા ચેતિ પઞ્ચપર્વા ।
પ્રત્યયસર્ગતદ્ભેદાસ્ત્વતિવિસ્તરભયાત્સન્તોઽપિ ન નિદર્શ્યન્તે પ્રત્યયસર્ગો બુદ્ધિસર્ગઃ ઉક્તઞ્ચ એષ પ્રત્યયસર્ગો વિપર્યયાશક્તિતુષ્ટિસિદ્ધ્યાખ્યઃ ।
પ્રતીયતેઽનેનેતિ પ્રત્યયો બુદ્ધિસ્તસ્ય સર્ગઃ પ્રત્યયસર્ગઃ ।
દૈવસર્ગસ્તુ મૂલકારેણૈવ સ્પષ્ટો નિરુક્તઃ । સ ચ અષ્ટવિકલ્પો દૈવઃ સર્ગઃ બ્રાહ્મપ્રાજાપત્યૈન્દ્રપૈત્ર્યગાન્ધર્વયાક્ષરાક્ષસપૈશાચ ઇત્યષ્ટવિકલ્પો દૈવસર્ગઃ । તિર્યગ્યોનયશ્ચ પઞ્ચવિધા ભવન્તિ પશુમૃગપક્ષિસરીસૃપસ્થાવરાઃ । માનુષશ્ચૈકવિધઃ બ્રાહ્મણત્વાદ્યવન્તરજાતિભેદાવિવક્ષયા સંસ્થાનસ્ય ચતુર્ષ્વપ્યવિશેષાદિતિ ॥

નનુ પ્રાધાનિકોઽયં સર્ગઃ પ્રધાનં ચ જડં કથં સ્વાર્થં પરાર્થં વા પ્રવૃત્તિં કર્તુમર્હતિ તસ્માત્કેનચિચ્ચેતનેન પ્રકૃત્યધિષ્ઠાત્રા ભવિતવ્યમ્ । ન ચ ક્ષેત્રજ્ઞાસ્તથા તેષાં પ્રકૃતિસ્વરૂપાનભિજ્ઞત્વાત્ તસ્માદસ્તિ પ્રકૃતેરધિષ્ઠાતા કશ્ચિત્સર્વજ્ઞઃ સ એવેશ્વર ઇતિ ચેન્ન અચેતનમપિ પ્રયોજનવશાત્ પ્રવર્તમાનં દૃષ્ટં યથા વત્સવિવૃદ્ધ્યર્થમચેતનમપિ ક્ષીરં પ્રવર્તતે તથા જડાપિ પ્રકૃતિઃ પુરુષવિમોક્ષાય પ્રવર્તિષ્યતે । કિઞ્ચાભોક્તુરીશ્વરસ્ય પ્રવૃત્તૌ ન કરુણાં વિનાઽન્યત્ પ્રયોજનં પશ્યામઃ । સા ચ નિરુપાધિપરદુઃખપ્રહાણેચ્છા સૃષ્ટેઃ પૂર્વં પ્રાણ્યભાવાદેવ તત્સમ્બન્ધિદુઃખાભાવાત્ કસ્ય નિવૃત્તૌ પ્રવૃત્તિઃ સ્યાદીશ્વરસ્ય । ન ચ સર્ગાનન્તરમીશ્વરપ્રવૃત્તિઃ સર્ગસ્ય જાતત્વાદેવ નેશ્વરપ્રયોજનં પશ્યામઃ । ન ચ દુઃખનિવૃત્તિઃ પ્રયોજનં તદર્થં તત્પ્રવૃત્તૌ જગતિ કોઽપિ દુઃખી ન સ્યાત્ । ઉક્તઞ્ચ પ્રેક્ષાવતઃ પ્રવૃત્તેઃ સ્વાર્થકારુણ્યાભ્યાં વ્યાપ્તત્વાત્ તે ચ જગત્સર્ગાદ્વ્યાવર્તમાને પ્રેક્ષાવત્પ્રવૃત્તિપૂર્વકત્વમપિ નિવર્તયતઃ ન હ્યાપ્તસકલેપ્સિતસ્ય ભગવતો જગત્સૃજતઃ કિમપ્યભિલષિતં ભવતિ નાપિ કારુણ્યાદસ્ય સર્ગે

પ્રવૃત્તિઃ પ્રાક્સર્ગાજ્જીવાનામિન્દ્રિયશરીરવિષયાનુત્પત્તૌ દુઃખાભાવેન કસ્ય
પ્રહાણેચ્છા કારુણ્યેન સૃષ્ટિઃ સૃષ્ટ્યા ચ કારુણ્યમિતિ પરસ્પરાશ્રયઃ ।
અપિ ચ કરુણયા પ્રવૃત્તઃ સુખિન એવ જન્તૂન્સૃજેત્ ન દરિદ્રાન્ ।
ન ચ કર્મવૈચિત્ર્યાત્ જગદ્વૈચિત્ર્યમ્ તર્હિ કૃતમીશ્વરેણ તત એવ
જગદ્વૈચિત્ર્યોપપત્તેઃ પ્રવૃત્તિસ્તુ પારાર્થ્યપ્રયોજનવશાત્ જડસ્યાપિ
દૃશ્યતે વત્સવિવૃદ્ધિનિમિત્તં દુગ્ધસ્યેવ ।
નનુ ભવતુ પ્રકૃતેઃ પ્રવર્તકઃ પુરુષાર્થો નિવર્તકં ન તુ કમપિ
પશ્યામ ઇતિ ચેન્ન યથા નર્તકી પરિષદ્ભ્યો નૃત્યં દર્શયિત્વા સ્વયમેવ
નિવર્તતે ન તુ તસ્યાઃ સ્વનિવૃત્તૌ નિવર્તકાન્તરાપેક્ષા તથા શબ્દાદ્યાત્મકં
સ્વસ્વરૂપં પુરુષાદ્ભેદેન પ્રકાશ્ય સાધિતપુરુષપ્રયોજના સ્વયમેવ
નિવર્તતે પ્રકૃતિઃ । યથાહુઃ સાંખ્યાચાર્યાઃ ।
રઙ્ગસ્ય દર્શયિત્વા નિવર્તતે યથા નર્તકી નૃત્યાત્ ।
પુરુષસ્ય તથાત્માનં પ્રકાશ્ય વિનિવર્તતે પ્રકૃતિઃ ॥

નનુ યથા દર્શિતનૃત્યા નર્તકી દ્રષ્ટકૌતુહલાત્પુનઃ પ્રવર્તતે
તથા પ્રકૃતિરપિ પુરુષાયાત્માનં દર્શયિત્વા નિવૃત્તાપિ પુનશ્ચેત્
પ્રવર્તેતે તદા મુક્તાનામપિ પુનઃ સંસારપ્રાપ્તિઃ સ્યાદિતિ ચેન્ન
યથા પરપુરુષદર્શનાસહા સૂર્યદર્શનવર્જિતાપિ કુલવધૂઃ
પ્રમાદાદ્વિગલિતાઙ્ગપટા ચેદવલોક્યતે પરપુરુષેણ તદાઽસૌ તથા
પ્રવર્તતેઽપ્રમત્તાં યથૈનાં પુનઃ પુરુષાન્તરાનિ ન પશ્યન્તિ તથા
પ્રકૃતિઃ કુલવધૂતોઽપ્યધિકા દૃષ્ટા બિંબકેન પુનર્ન દર્શનમાર્ગમેતિ ।
ઉક્તં ચ ।
પ્રકૃતેઃ સુકુમારતરં ન કિઞ્ચિદસ્તીતિ મે મતિર્ભવતિ ।
યા દૃષ્ટાસ્મીતિ પુનર્ન દર્શનમુપૈતિ પુરુષસ્યેતિ ॥

ધર્મો જ્ઞાનં વિરાગ ઐશ્વર્યમિતિ સાત્ત્વિકા બુદ્ધિધર્માઃ ।
અધર્માજ્ઞાનાવૈરાગ્યાનૈશ્વર્યાભિધાનાશ્ચત્વારસ્તામસાઃ ।
અત્ર જ્ઞાનવર્જિતૈઃ સપ્તભિઃ પ્રકૃતિર્બધ્નાત્યાત્માનં વિવેકખ્યાત્યા
પ્રકૃતિપુરુષાન્યતાજ્ઞાનેન સૈવ વિમોચયતિ । ઉક્તઞ્ચ ।
રૂપૈઃ સપ્તભિરેવમ્બધ્નાત્યાત્માનમાત્મના પ્રકૃતિઃ ।
સૈવ ચ પુરુષાર્થમ પ્રતિ વિમોચયત્યેકરૂપેણ ॥

યથા વિદ્રુમમણિમૌક્તિકશુક્તિમકરકચ્છપનાગશંખકપર્દકાદીન્
વિહાય પરમકારુણિકેન લીલાવિગ્રહધારિણા ભગવતા

રત્યાન્યેવ સમુદ્ધૃતાન્યુદધેર્દેવસમૃદ્ધ્યર્થં તથા
જલ્પતર્કાભાસાખ્યાડન્યત્રસુલભપ્રમેયવિતણ્ડાદીંશ્ચ વિહાય
સાંખ્યમાત્રૈકલભ્યપ્રમેયરત્નાનિ સાંખ્યતંત્રાધ્યયનપરિશ્રમાલસાનાં
સાંખ્યતન્ત્રોદધેર્મયા સમુદ્ધૃતાનિ ।
રામકૃષ્ણકથા યાવદ્યાવચ્ચન્દ્રદિવાકરૌ ।
સાંખ્યતત્ત્વપ્રદીપોડયં તાવદસ્તુ મહીતલે ॥

ઇતિ
શ્રીમત્પરમહંસપરિવ્રાજકાચાર્યપૂજ્યપાદશ્રીવૈકુણ્ઠશિષ્યયતિકવિરાજયતિપ્રકાશિતઃ
સાંખ્યતત્ત્વપ્રદીપઃ સમાપ્તઃ ॥

Encoded and proofread by Dhaval Patel drdhaval2785 at gmail.com

*sAMkhyatattvapradIpaH*
pdf was typeset on March 24, 2024

Please send corrections to *sanskrit@cheerful.com*